॥ सभाष्या आथर्वणोपनिषत् २२ माण्डूकोपनिषत् २३
षट्प्रश्नोपनिषत् २४ तलवकारोपनिषच्च २५ ॥

श्रीमन्मध्वहृत्सरोजांतर्वर्तिश्रीलक्ष्मीवेंकटेशायनमः ॥ ॥ ॐ ॥ अनंतगुणपूर्णत्वादगम्यायसुरैरपि ॥ सर्वे ष्टदात्रेदेवानांनमोनारायणायते ॥ वैजयंतेसमासीनमेकांतेचतुराननम् ॥ विष्णोर्विविदिषुस्तत्त्वंपर्यपृ च्छत्सदाशिवः ॥ यदिदंपुरुषावश्यंतत्रतत्रपतेन्मनः ॥ केनतत्प्रेरितंयातिप्राणःसर्वोत्तमस्तथा ॥ चक्षुःश्रो

श्रीमद्भारतीरमणमुख्यप्राणांतर्गतरमाजानयेनमः ॥ ॥ हरिःॐ ॥ केनेषितंपततिप्रेषितंमनः केनप्राणःप्रथमःप्रैतियुक्तः ॥ केनेषितांवाचमिमांवदंतिचक्षुःश्रोत्रंकउदेवोयुनक्ति ॥ श्रोत्र स्यश्रोत्रंमनसोमनोयद्वाचोहवाचंसउप्राणस्यप्राणःचक्षुषश्चक्षुरतिमुच्यधीराःप्रेत्यास्माल्लोका दमृताभवंति ॥ ननत्रचक्षुर्गच्छतिनवाग्गच्छतिनोमनोनविद्मनविजानीमोयथैतदनुशिष्या त् ॥ अन्यदेवतद्विदितादथोअविदितादधि ॥ इतिशुश्रुमपूर्वेषांयेनस्तद्व्याचचक्षिरे ॥ यद्वा चानभ्युदितंयेनवागभ्युद्यते ॥ तदेवब्रह्मत्वंविद्धिनेदंयदिदमुपासते ॥ यन्मनसानमनुतेयेना हुर्मनोमतम्॥तदेवब्रह्मत्वंविद्धिनेदंयदिदमुपासते॥यच्चक्षुषानपश्यतियेनचक्षूंषिपश्यति॥तदे वब्रह्मत्वंविद्धिनेदंयदिदमुपासते॥यच्छ्रोत्रेणनशृणोतियेनश्रोत्रमिदंश्रुतम् ॥ तदेवब्रह्मत्वंवि द्धिनेदंयदिदमुपासते॥यत्प्राणेननप्राणितियेनप्राणःप्रणीयते॥तदेवब्रह्मत्वंविद्धिनेदंयदिदमुपा सते॥ १॥यदिमन्यसेसुवेदेतिदहरमेवापिनूनंत्वंवेत्थब्रह्मणोरूपम्॥यदस्यत्वंयदस्यदेवेष्वथनूमी

त्रंतथावाचंकोदेवोविनियोजयेत् ॥ इतिपृष्टस्तदाब्रह्माप्राहदेवमुमापतिम् ॥ ध्यात्वानारायणंदेवंसर्वाधा रमनूपमम् ॥ सर्वज्ञंसर्वशक्तिंचसर्वदोषविवर्जितम् ॥ यःप्राणस्यप्रणेताचचक्षुरादेश्वसर्वशः ॥ अगम्यःस र्वदेवैश्चपरिपूर्णत्वहेतुतः ॥ प्राणादीनांप्रणेताचसर्ववेत्ताचसर्वशः ॥ सर्वोत्तमश्चसर्वत्रसविष्णुरितिधार्य

ताम् ॥ १ ॥ यंसम्यङ्नैवजानातिकश्चिन्निरवशेषतः ॥ सर्वात्मनाविजानामीतितुयस्यमतंभवेत् ॥ तस्या
ज्ञातःसभगवान्योनैवंमन्यतेसदा ॥ ज्ञातस्तस्यतथास्यैवनिःशेषंमननंकृतम् ॥ इतियोमन्यतेनास्यमतः
सपुरुषोत्तमः ॥ नातिवेद्योनचावेद्यस्तस्मात्सपरमेश्वरः ॥ नेदंजीवस्वरूपंतद्ब्रह्मविष्ण्वाख्यमव्ययम् ॥ किं
तुयत्तेसमीपस्थमासतेविनियामकम् ॥ तदेवब्रह्मविद्धित्वंविष्ण्वाख्यंपरमव्ययम् ॥ नियामकंतद्देवानां
मांस्यमेवते॥मन्येविदितंनाहंमन्येसुवेदेति॥नोनवेदेतिवेदच॥योनस्तद्वेदतद्वेदनोनवेदेतिवेदच॥
यस्यामतंतस्यमतंमतंयस्यनवेदसः॥अविज्ञातंविजानतांविज्ञातमविजानताम्॥प्रतिबोधविदि
तंमतमृतत्वंहिविंदते॥आत्मनाविंदतेवीर्यंविद्ययाविंदतेमृतम्॥इहचेदवेदीदथसत्यमस्ति॥नचे
दिहावेदीन्महतीविनष्टिः॥भूतेषुभूतेषुविचित्यधीराः॥प्रेत्यास्माल्लोकादमृताभवंति॥ २॥ब्रह्मह
देवेभ्योविजिग्ये॥अथतस्यहब्रह्मणोविजयेदेवाअमहीयंततऐक्षंत॥अस्माकमेवायंविजयोअ
स्माकमेवायंमहिमेति॥तद्धैषांविजज्ञौ॥तेभ्योहप्रादुर्बभूव॥तन्नव्यजानंत॥किमिदंयक्षमिति॥
तेग्निमब्रुवन्॥जातवेदएतद्विजानीहिकिमेतद्यक्षमिति॥तथेतितदभ्यद्रवत्॥तमभ्यवदत्कोसी
त्यग्निर्वाअहमस्मीत्यब्रवीज्जातवेदावाअहमस्मीति॥तस्मिंस्त्वयिकिंवीर्यमित्यपीदंसर्वंदहेयंय
मर्त्यानांकिमुतोत्तमम् ॥ तत्प्रसादंविनाजीवेमंतव्यानप्रवृत्तयः ॥ किमुजीवस्यतद्भावोनमंतव्यइतीर्यते
॥ २ ॥ इत्यत्राख्यायिकांवच्मिशृणुतांत्वंमहेश्वर ॥ स्थित्वादेवेषुतद्ब्रह्मव्यजयद्दैत्यदानवान् ॥ देवेभ्यो
र्थायविजयंतेदेवामेनिरेत्यकम् ॥ आविष्टाअसुरैस्तेषांप्रबोधायजनार्दनः ॥ यक्षरूपःप्रादुरभूदुमाशिव
समन्वितः ॥ ब्रह्मणाचापिसहितएतेभ्योपिपरोह्यहम् ॥ एतेपिमेभृत्यभूताःपरिवार्यव्यवस्थिताः ॥ इति

ज्ञापयितुंविष्णुःसहतैरप्युपागतः ॥ यूयमेतानपिज्ञातुमशक्ताःकिमुमामिति ॥ तज्ज्ञानार्थंहुताशश्वनासिक्योवायुरेवच ॥ इंद्रश्चक्रमशोजग्मुस्तंज्ञातुंनैवचाशकन् ॥ तत्रेंद्रोधिकबुद्धित्वात्पृच्छतीतिजनार्दनः ॥ मत्तःशिवाद्ब्रह्मणश्चश्रोतुंनैवापिशक्तिमान् ॥ इतिज्ञापयितुंतत्रनादृश्यतसकेशवः ॥ एषैवज्ञानदानेतेयोग्योमेतिव्यदर्शयत् ॥ ३ ॥ उमासासम्यगाचष्टतस्मैविष्णुंपरंपदम ॥ यस्माद्ब्रह्माचवायुश्चशेषवींद्रौशि

दिदंपृथिव्यामितितस्मैतृणंनिदधावेतद्दहेति ॥ तदुपप्रेयायसर्वजवेन ॥ तन्नशशाकदग्धुम् ॥ सततएवनिवर्तते ॥ नैतदशकंविज्ञातुंयदेतद्यक्षमिति ॥ अथवायुमब्रवन् ॥ वायवेतद्विजानीहिकिमेतद्यक्षमिति ॥ तथेतितदभ्यद्रवत् ॥ तमभ्यवदत्कोसीति॥ वायुर्वाअहमस्मीत्यब्रवीत् ॥ मातरिश्वावाअहमस्मीति ॥ तस्मिंस्त्वयिकिंवीर्यमिति ॥ अपीदंसर्वमाददीयंयदिदंपृथिव्यामिति ॥ तस्मैतृणंनिदधावेतदादत्स्वेतितदुपप्रेयायसर्वजवेनतन्नशशाकादातुम् ॥ सततएवनिवर्तते ॥ नैतदशकंविज्ञातुम् ॥ यदेतद्यक्षमिति ॥ अथेंद्रमब्रुवन् ॥ मघवन्नेतद्विजानीहिकिमेतद्यक्षमितितथेतितदभ्यद्रवत्॥ तस्मात्तिरोदधे॥ सतस्मिन्नेवाकाशेस्त्रियमाजगामबहुशोभमानामुमांहैमवतीम् ॥ तांहोवाचकिमेतद्यक्षमिति ॥३ ॥ ब्रह्मेतिहोवाच ॥ ब्रह्मणोवाएतद्विजयेदेवाअमहीयध्वमिति ॥ ततोहवैविदांचकारब्रह्मेति ॥ तस्माद्वाएतेदेवाअति

वस्तथा ॥ सभार्यागर्विणोनासन्सुरेभ्यस्तेधिकास्ततः ॥ इंद्रस्तुप्रथमंब्रह्मव्यजानात्तेनतूत्तमः ॥ दक्षादिभ्यस्तथाकामस्तज्ज्ञातुंपूर्वमुक्तवान् ॥ दक्षोबृहस्पतिश्चैवमनुःकामात्मजस्तथा ॥ सूर्याचंद्रमसौधर्मोवरुणश्चोचुरोमिति ॥ नासिक्यवायुरग्निश्चप्रथमंतदपश्यताम् ॥ सर्वेदेवाधिकास्तस्मादेतेदेवाःप्रकीर्तिताः ॥ एतेभ्यश्चेंद्रकामौतुताभ्यांब्रह्मादयोधिकाः ॥ एतेषामवमोवह्निःपरमोविष्णुरुच्यते ॥ अंतरालेस्थितास्त्व

न्येब्रह्माद्याःपूर्वमीरिताः ॥ अग्निःपश्चाद्यजानात्तदिंद्रवाक्यात्ततोवमः ॥ तस्माद्विष्ण्वभिसंबंधात्पारा
वर्यंसुरेष्विदम् ॥ व्यद्योतयद्विद्युदादीन्कपिलाख्यस्तुयोहरिः ॥ अक्ष्णोर्निमेषणंकृत्वायःशेतेक्षीरसागरे ॥
सएवैकःपरंब्रह्मेत्येवंतस्योपदेशनम् ॥ आधिदैवेतथाध्यात्मेयंमनोगच्छतीवच ॥ सम्यङ्गच्छतिकापिम
नोयेनस्मरत्यपि ॥ सोनिरुद्धाख्यईशेशःपरंब्रह्मेतिकीर्त्यते ॥ सविष्णुस्तद्वनंनामततत्वाद्वननीयतः ॥ एव
मेनंतुयोवेदभवेत्सर्वैरपेक्षितः ॥ एतच्छ्रुत्वाहरोपृच्छद्ब्रह्माणंपुनरेवतु ॥ विद्याकारंममब्रूहीत्युक्तोब्रह्माहतं
पुनः ॥ विद्यावेद्यंतवप्रोक्तमास्थानंतेवदाम्यहम् ॥ तपोदमस्त्वधर्मेषुयेस्थितास्तेषुतिष्ठति ॥ विद्यास्थाना

तरामिवान्यान्देवान्यदग्निर्वायुरिंद्रस्तेह्येनन्नेदिष्ठंपस्पृशुः ॥ तेह्येनत्प्रथमोविदांचकारब्रह्मेति॥
तस्माद्वाइंद्रोतितरामिवान्यान्देवान् ॥ सह्येनन्नेदिष्ठंपस्पर्श ॥ सह्येनत्प्रथमोविदांचकारब्रह्मे
ति ॥ तस्यैषआदेशोयदेतद्विद्युतोऽन्यद्युतदा३इति ।। न्यमीमिषदा३इत्यधिदैवतम् ॥ अ

नितस्यास्तुवेदाअंगानिनिर्णयः ॥ वेदैतामेवमखिलंयोविष्णौप्रतितिष्ठतीत्यादिब्रह्मसारे ॥ विद्युतःसूर्या
दिप्रकाशान् ॥ आसमंताद्यद्युतत्प्राकाशयत् ॥ यदादित्यगतंतेजोजगद्भासयतेखिलम् ॥ यच्चंद्रमसिय
च्चाग्नौतत्तेजोविद्धिमामकमितिवचनात् ॥ तमेवभांतमनुभातिसर्वंतस्यभासासर्वमिदंविभातीतिच ॥ न्य
मीमिषत् आसमंतान्निमीलिताक्षमभवत् ॥ सवैकिलायंपुरुषःपुरातनोयएकआसीदविशेषआत्मनि ॥
अथेगुणेभ्योजगदात्मनीश्वरेनिमीलितात्मानिशिसुप्तशक्तिष्वितिवचनात् ॥ पूर्णत्वाच्चआः ॥ अभी

क्ष्णंसंकल्पइतिमनसोविशेषणम् ॥ संकल्पकमित्यर्थः ॥ सप्रतिष्ठांसायतनामुपनिषदंब्रूहीत्युक्तेसम्यगेवम
योपनिषत्स्वरूपमुक्तम् ॥ तत्रवक्तव्यंनास्ति ॥ तपोदमःकर्मचविद्यायाःप्रतिष्ठा ॥ तद्वत्सुविद्याप्रतितिष्ठ
तीत्यर्थः ॥ सत्यमितिमीमांसा ॥ निर्णीयतेयतःसम्यगिदंसत्यमितिस्फुटम् ॥ श्रुतिस्मृत्युदितंसर्वंव्यक्तंमी

थाध्यात्मम् ॥ यदेतद्वच्छतीवचमनोनेनैवतदुपस्मरति ॥ अभीक्ष्णंसंकल्पस्तद्धतद्वनंनामत
द्वनमित्युपासितव्यम् ॥ सयएतदेवंवेदाभिहैनंसर्वाणिभूतानिसंवांछंति ॥ उपनिषदंभोब्रूही
ति ॥ उक्तातउपनिषत् ॥ ब्राह्मींवावतउपनिषदमब्रूमेति ॥ तस्यैतपोदमःकर्मेतिप्रतिष्ठा ॥
वेदाःसर्वांगानिसत्यमायतनम् ॥ योहवाएतामुपनिषदमेवंवेदापहत्यपाप्मानमनंतेस्वर्गेलोकेज्ये
येप्रतितिष्ठतिज्येयेप्रतितिष्ठति ॥ ४ ॥ इतितलवकारोपनिषत्समाप्ता ॥

मांसयैतया ॥ सत्यमित्युच्यतेतस्मान्मीमांसाब्रह्मनिश्चयइतिशब्दनिर्णये ॥ ऋग्यजुःसामाथर्वाख्याःपं
चरात्रंचभारतम् ॥ मूलरामायणंचैवपुराणंभगवत्परम् ॥ वेदाइत्युच्यतेसद्भिःशिक्षाद्यंस्मृतयस्तथा ॥ अं
गानिसत्यंमीमांसातद्विद्यायतनंत्रयमितिविद्यानिर्णये ॥ यश्चिदानंदसच्छक्तिसंपूर्णोभगवान्परः ॥ नमो
स्तुविष्णवेतस्मैश्रेष्ठायश्रेयसांचमे ॥ इतिश्रीमदानंदतीर्थभगवत्पादविरचितंतलवकारोपनिषद्भाष्यंसंपूर्णम् ॥



॥ सभाष्या आथर्वणोपनिषत् २२ माण्डूक्योपनिषत् २३
षट्प्रश्नोपनिषत् २४ तलवकारोपनिषच्च २५ संपूर्णाः ॥